# श्रीमन्मध्वसिद्धान्तप्रबोधिनी संस्कृतमहापाठशाला, उडुपिक्षेत्रम्

(संस्कृतविश्वविद्यालयेन मानिता)









# Sriman Madhwa Siddhanta Prabodhini Samskrita College, Udupi.

## परिचयपुस्तकम्

## PROSPECTUS
## 2026-27







# श्रीमन्मध्वसिद्धान्तप्रबोधिनी
# संस्कृतमहापाठशाला, उडुपिक्षेत्रम्

(संस्कृतविश्वविद्यालयेन मानिता)

## Sriman Madhwa Siddhanta Prabodhini
## Samskrita College, Udupi.

महाविद्यालयस्य

# परिचयपुस्तकम्

# PROSPECTUS
## 2026-27

SMSP Sanskrit College, Udupi-576101. Karnataka.
Ph. No. : 0820-2521441 (O), 9844029551 / 9481963567 (M)
E-Mail : smspsanskritcollege.udupi@gmail.com

श्रीश्रीमन्मध्वसिद्धान्तप्रबोधिन्यमृतप्रदा ।
कामधेनुर्बुधाराध्या राजतां राजतासने ॥

# महाविद्यालयीयं प्रातःस्तोत्रम्

जयति हरिरचिन्त्यः सर्वदेवैकवन्द्यः परमगुरुरभीष्टावाप्तिदः सज्जनानाम् ।
निखिलगुणगणार्णो नित्यनिर्मुक्तदोषः सरसिजनयनोऽसौ श्रीपतिर्मानदो नः ॥

निर्मथ्योग्रभवार्णवे निजमनोऽभीष्टं दिशामीति यः
सम्यग्ज्ञापयितुं करेण विलसन्मन्थानमन्येन च ।
रम्यं दाम दधन्महेशरजतग्रामश्रियोऽलङ्कृतिः
कर्मन्दीश्वरभक्तिबन्धनवशः प्रीतोऽस्तु कृष्णः प्रभुः ॥

# राष्ट्रियसेवायोजनाया गीतम्

देशरागः — मिश्रच्छापुतालः

भारताम्बा सारगर्भा राजतां जगतीतले ।
सेवया तां तोषयेमहि देशमङ्गलकाङ्क्षया ॥ (प)
मेदिनीजलमारुतादिं भूतनिकरं कलुषितम् ।
पावयन्तो लोककुशलं साधयेमहि सत्वरम् ॥
शोकपीडितमानसानां मानवानां सान्त्वने ।
आत्महस्तं सारयेमहि करुणया स्वार्थं विना ॥
तमसि पततां बालिशानां साधुगम्यप्राप्तये ।
दीपिकामिव दर्शयेमहि भारतीयां संस्कृतिम् ॥
परमितो मा पततु भूमौ सैनिकानां शोणितम् ।
पततु कर्मसु तत्पराणां स्वेदधारा नः सदा ॥

-डा. महेशभट्टः, हार्याडि.

# श्रीमन्मध्वसिद्धान्तप्रबोधिनी संस्कृतमहापाठशाला, उडुपी
## निर्मातारस्तत्रभवन्तो मठाधीशाः

| | | |
|---|---|---|
| १. श्रीसुधीन्द्रतीर्थश्रीपादाः | श्रीपुत्तिकामठाधीशाः | श्रीमदुपेन्द्रतीर्थसंस्थानम् |
| २. श्रीविबुधप्रियतीर्थश्रीपादाः | श्रीमदमारुमठाधीशाः | श्रीनरसिंहतीर्थसंस्थानम् |
| ३. श्रीविद्यापूर्णतीर्थश्रीपादाः | श्रीकृष्णापुरमठाधीशाः | श्रीजनार्दनतीर्थसंस्थानम् |
| ४. श्रीरघुप्रियतीर्थश्रीपादाः | श्रीपलिमारुमठाधीशाः | श्रीहृषीकेशतीर्थसंस्थानम् |
| ५. श्रीविश्वज्ञतीर्थश्रीपादाः | श्रीपेजावरमठाधीशाः | श्रीमदधोक्षजतीर्थसंस्थानम् |
| ६. श्रीलक्ष्मीसमुद्रतीर्थश्रीपादाः | श्रीशीरूरुमठाधीशाः | श्रीवामनतीर्थसंस्थानम् |
| ७. श्रीविश्वेन्द्रतीर्थश्रीपादाः | श्रीसोदामठाधीशाः | श्रीविष्णुतीर्थसंस्थानम् |
| ८. श्रीविद्यासमुद्रतीर्थश्रीपादाः | श्रीकाणूरुमठाधीशाः | श्रीरामतीर्थसंस्थानम् |

## एस्,एम्.एस्.पि.सभायाः साम्प्रतिकी शासनसमितिः

| | | | |
|---|---|---|---|
| १. | श्रीवेदवर्धनतीर्थश्रीपादाः | श्रीशीरूरुमठः | – अध्यक्षाः |
| २. | श्रीविद्यासागरतीर्थश्रीपादाः | श्रीकृष्णापुरमठः | – पोषकाः |
| ३. | श्रीविश्वप्रियतीर्थश्रीपादाः | श्रीमददमारुमठः | – पोषकाः |
| ४. | श्रीसुगुणेन्द्रतीर्थश्रीपादाः | श्रीपुत्तिकामठः | – पोषकाः |
| ५. | श्रीविद्याधीशतीर्थश्रीपादाः | श्रीपलिमारुमठः | – पोषकाः |
| ६. | श्रीविश्वप्रसन्नतीर्थश्रीपादाः | श्रीपेजावरमठः | – कार्याध्यक्षाः |
| ७. | श्रीविद्यावल्लभतीर्थश्रीपादाः | श्रीकाणूरुमठः | – पोषकाः |
| ८. | श्रीविश्ववल्लभतीर्थश्रीपादाः | श्रीसोदावादिराजमठः | – पोषकाः |

## निर्वाचिताः सदस्याः

| | |
|---|---|
| ९. विद्वान् गोपालकृष्णजोयिसः | – कार्यदर्शी सञ्चालकश्च |
| १०. श्रीमान् एम्. चन्द्रशेखर आचार्यः | – कोशाधिकारी |
| ११. श्रीमान् एम्. रघुरामाचार्यः | – सदस्यः |
| १२. विद्वान् उदयकुमारसरळत्तायः | – सदस्यः |
| १३. श्रीमान् सुब्रह्मण्यभट्टः | – सदस्यः |
| १४. श्रीमान् ओंप्रकाश भट्ट : | – सदस्यः |
| १५. श्रीमान् सुधीन्द्र आचार्यः | – सदस्यः |

# संक्षिप्तमैतिह्यम्

अस्मिन् भारतवर्षे दक्षिणापथे पश्चिमायां दिशि समुद्रस्य यत्तीरं तत्र बहूनि बहुविधानि च पावनानि तीर्थानि सन्ति। तेषु अन्यतमं वर्तते रौप्यपीठम्। रजतपीठमिति अस्य नामान्तरम्। भगवतः श्रीमदनन्तेश्वरस्य सन्निधानात् प्रदेशोऽयं नाम्नानेन प्रसिद्धिं गतः। उडुपाभिधानश्चन्द्रोऽत्र भगवन्तं परमेश्वरं ध्यायन् चिरं तपश्चचारेति हेतोः प्रदेशस्य 'उडुपी' इत्यपि नाम प्रसिद्धम्। एवंविधे पुण्यकरे क्षेत्रे त्रयोदशे शतके इत एवानतिदूरवर्तिनि पाजकाख्यप्रदेशे वासुदेवाभिधानो वटुः आचारविचारसम्पन्ने ब्राह्मणकुले जनिं जगाम। वायोरपरं रूपमिति प्रथिता इमे उत्तरत्र 'मध्वाचार्य' इति ख्याताः श्रीमदनन्तेश्वरस्य सविधे स्वाराध्यस्य भगवतः श्रीकृष्णस्य कञ्चन मठं प्रतिष्ठापयामासुः, तद्वरिवस्यार्थं शिष्यान् परिगृह्य रौप्यपीठं परितः प्रदेशेषु अष्टौ मठान् निर्मापयामासुः, सर्वेषामुपनिषदादीनां जीवब्रह्मणोर्भेद एव तात्पर्यमिति द्वैतसिद्धान्तं चाविष्कारयामासुः।

भगवतः श्रीकृष्णस्य पूजार्थं नियुक्ता ये परिव्राजकाः सन्ति तेषां परम्परायां समायाता यतयस्तावत् शास्त्राणां किञ्चिदध्ययनकेन्द्रम् आवश्यकमिति मन्यमानाः श्रीमद्राघवेन्द्रस्वामिनां पुण्यतिथौ शालिवाहनशके सुखोदयमिते (१८२७) क्रोधिनामके संवत्सरे (क्रिस्तशके १९०४तमे वर्षे) श्रावणमासे कृष्णपक्षे द्वितीयायां तिथौ 'श्रीमन्मध्वसिद्धान्तप्रबोधिनी संस्कृतपाठशाला' इति विद्यालयमिमं सत्तामानिन्युः, तदधिकृत्य कृतोऽयं श्लोकः

शालीवाहशके सुखोदयमिते क्रोध्यब्दके श्रावणे
पक्षे श्यामलके द्वितीयदिवसे शालेयमाविष्कृता।
श्रीमन्मध्वमुनीन्द्रवंशतिलकैरष्टाभिरिष्टप्रदै–
र्दिक्पालैरिव भव्यगेयचरितैः संवर्धिता राजताम्॥

आदौ श्रीमदनन्तेश्वरदेवालये प्रक्रान्तोऽयं विद्यालयः क्रमेण श्रीचन्द्रमौलीश्वरदेवालयेऽपि प्रसृतः सन् मद्रपुरीविश्वविद्यालयस्य प्रोत्साहेन क्रिस्तशके १९१९तमे वत्सरे संस्कृतमहापाठशालेति व्यपदेशमियाय। तदनु क्रिस्तशके १९४०तमे वत्सरे छात्राणां संख्याकृतां वृद्धिं पश्यन्तः तत्रभवन्तः श्रीमददमारुमठाधीशाः श्रीविबुधमान्यतीर्थश्रीपादाः 'संस्कृताध्ययनस्य कश्चिन्मार्गो व्यवस्थितो विधेयः' इति विचार्य डा. रामरावमहोदयेन प्रदत्तेऽस्मिन् प्रदेशे नूतनं किञ्चिद्भवनं निर्मातुं प्राक्रमन्त। अस्माकं च भाग्यदोषात् तेषु पाञ्चभौतिकं शरीरं विहाय वृन्दावनं प्रविष्टेषु, तद्भवनस्य निर्मितौ श्रीपलिमारुमठाधीशाः तत्रभवन्तः श्रीरघुमान्यतीर्थश्रीपादा महान्तं यत्नमकार्षुः। तेष्वपि अस्मद्भाग्यदोषेण वृन्दावनं प्रविष्टेषु, श्रीमददमारुमठाधीशाः श्रीविबुधप्रियतीर्थश्रीपादा अपूर्णमिदं भवनं १९५१तमे वर्षे पूर्णं विधाय सर्वेषां संस्कृताभिमानिनां मनोरथं सफलं व्यदधुः।

अद्य सर्वेषामष्टमठाधीशानाम् अनुग्रहेण, अन्येषां च संस्कृतासक्तचित्तानां प्रोत्साहेन प्रवर्धमानोऽयं महाविद्यालयः क्रिस्तशके १९८२तमे वर्षे रत्नोत्सवस्य, २००४तमे वर्षे

शतमानोत्सवस्य च भाजनीभूतः सन् प्रत्यहं प्रवरीवृधीति । अस्मिन् महाविद्यालये कृताध्ययना बहवश्च्छात्रास्तावत् तत्र तत्र मठाधिपतयः, धर्माधिकारिणः, ज्यौतिषिकाः, अर्चकाः, पुरोधसः, शिक्षकाः, कवयः, विमर्शकाः, अन्ये च तथाविधे सर्वजनकाङ्क्ष्ये माननीये च पदे वर्तमाना महाविद्यालयस्य कीर्तिं सर्वत्र प्रसारयन्तो विलसन्तीति अस्माकं सन्तोषमातनोति ।

अस्य च महाविद्यालयस्य प्रशासनाय क्रिस्तशके १९१३तमे वर्षे 'एस्.एम्.एस्.पि. सभा' इत्यभिधाना काचित्समितिः निरमीयत । तत्र पर्यायप्राप्तश्रीकृष्णपूजादीक्षा यतयोऽध्यक्षा भवन्ति, अन्ये च मठाधीशाः पोषकाः । ते च तत्रभवन्तः काले काले निर्वाचितैः सदस्यैरुपबृंहिताया अस्याः शासनसमितेः सहकारेण महाविद्यालयमिमम् अशनादिदानेन वर्धयन्तः सन्ति, संस्कृतानुरक्ताश्च यथाशक्ति धनादिदानेन उपाजेकुर्वन्ति । अद्यत्वे पुनः सर्वेषामिच्छया कार्यसौकर्याय श्रीपेजावरमठाधीशाः तत्रभवन्तः श्रीश्री विश्वप्रसन्नतीर्थश्रीपादाः कार्याध्यक्षपदे स्थिता मार्गदर्शनं विदधानाः सन्ति । बोधकानां तदितराणां च सर्वमपि वृन्दमस्य महाविद्यालयस्य उन्नतौ सन्ततं श्रममनुभवति । अध्येतारश्च छात्रा राज्यस्तरासु राष्ट्रस्तरासु च उच्चावचासु स्पर्धासु भागं गृह्णन्तो जयं लभमानाः सन्ति । भवनमिदं सर्वथा नवतां गतम् आसेचनकं विराजते ।

एस्.एम्.एस्.पि. संस्कृतमहाविद्यालय इति प्रत्नेन नाम्ना प्रसिद्धः सोऽयं महाविद्यालयः सम्प्रति कर्णाटकसंस्कृतविश्वविद्यालयेन मानितः सन् श्रीमन्मध्वसिद्धान्तप्रबोधकसंस्कृताध्ययन–केन्द्रमिति प्रत्यग्राभिधानो द्वितीयशतमानोत्सवम् अभिवरीवरीति ।

## बोधकाः कर्मकराः च

प्रकृते च महाविद्यालये साहित्यकक्ष्यया साकं द्वैतवेदान्तः, नवीनन्यायः, ज्यौतिषम्, अलङ्कारश्चेति शास्त्रचतुष्टयं बोध्यमानं वर्तते । तत्र एकः प्राचार्यः, त्रयः प्राध्यापकाः, द्वौ सहायप्राध्यापकौ, एकश्च प्रथमस्तरः सहाय इति समवायेन सप्त जनाः प्रशासनीयानुदानेन सेवां विदधानाः सन्ति । अन्ये च सेवां कुर्वन्तः सन्ति शासनसमित्या नियुक्ताः । ते च यथा –

- **प्राचार्यः**

१. डा. अमृतेशाचार्यः डि.एस्. अलङ्कारशास्त्रविद्वान्,
M.Com. M.A. (San), Ph.D - (M) 9481963567

- **द्वैतवेदान्तविभागः**

२. डा. षण्मुखहेब्बारः, प्राध्यापकः. द्वैतवेदान्तविद्वान्, तन्त्रसारागमप्रवीणः,
M.A. (San), M.Ed, Ph.D - (M) 9481748819

- **नवीनन्यायविभागः**

३. प्रो. सत्यनारायणवेङ्कट राव्, प्राध्यापकः. नवीनन्यायविद्वान्,
M.A (San) - (M) 8861292896

- **ज्यौतिषविभागः**

४. डा.डि.शिवप्रसादतन्त्री प्राध्यापकः. ज्यौतिषे नवीनन्याये च विद्वान्, वातुलागमप्रवीणः,
M.A. (San). Ph.D - (M) 9449330823

- **अलङ्कारविभागः**

५. डा. महेशभट्टः आर्. सहायप्राध्यापकः. अलङ्कारविद्वान्. Ph.D
(M) 9481268154 / 9686548530

- **सामान्यविभागः**

६. डा. भाग्यलक्ष्मीः वि. साहित्यसहायिका,
M.A. (San). M.Ed, Ph.D - (M) 9535269754

- उपन्यासकाः

७. डा. पि.अजितकुमारः, द्वैतवेदान्ते नवीनन्याये च विद्वान्,
M.A (San), B.Com, B.Lib - (M) 7411974421/7019964681

८. डा. महेन्द्रसोमयाजी,. द्वैतवेदान्ते ज्यौतिषे च विद्वान्,
तन्त्रसारागमप्रवीणः (M) 9686325038

९. विद्वान् राधेशः, अलङ्कारविद्वान्, B. Com - (M) 9964509976

१०. डा. राधाकृष्णः बि, ज्यौतिषविद्वान् – (M) 8904045292

११. विद्वान् नरहरिमूर्तिः, वेदान्तविद्वान्. (M) 9844368783

१२. विद्वान् अनिलजोशिः टि, ,न्यायविद्वान्. (M) 8310724192

१३. विद्वान् श्रीनिवासतन्त्री, ज्यौतिषविद्वान्. (M) 8660656856

१४. विदुषी ऐश्वर्या, व्याकरणाचार्या. (M) 8431148397

१५. श्रीमान् नरसिंहसोमयाजी, B.E Comp.Sc. (M) 9844034670

# बोधकेतराः

१५. विद्वान् प्रशान्तः, प्रथमस्तरः सहायः, द्वैतवेदान्तविद्वान्.
M.A (San), B.Com - (M) 9844029551

१६. श्रीमान्, सुदर्शन अडिगः, ग्रन्थपालकः, B.A,B.Ed 9480607123.

१७. कुमारी श्रीलक्ष्मीः कार्यालयसहायिका, B.A,M.S.W 8277004531

१८. श्रीमान् श्रीधरः, भृत्यः (M) 8105782364

१९. श्रीमती सुनीता, भृत्या (M) 9900311975

२०. श्रीमती मञ्जुला, भृत्या (M) 8748030857

# प्रवेशार्हता

## १. साहित्यम् / PUC

कक्ष्येयं वर्षद्वयावधिकी । तत्र प्रथमे वर्षे समवायेन षट् (६) पत्रिकाः सन्ति । तासु आदिमं द्वयं भाषासम्बद्धम्, (प्रथमाभाषा संस्कृत–कन्नडयोरन्यतमा, द्वितीयाभाषा आङ्ग्ल–हिन्दीभाषयोः अन्यतमा) भाषाविषये पदवीपूर्वकक्ष्यायाः प्रथमवर्षस्य (ठरइ–ल) यत्पाठ्यपुस्तकं तदेवात्रापि निर्णीतम् । अन्यस्य च पत्रिकाचतुष्टयस्य क्रमेण साहित्यसोपानम् –१. साहित्यसोपानम् –२. व्याकरणसोपानम्, तर्कसोपानं च पाठ्यपुस्तकत्वेन निर्णीतमस्ति । अत्रायं तावन्नियमः –

१. काव्यपरीक्षायाम् उत्तीर्णत्वम् ।

२. सामान्यशिक्षणे दशमकक्ष्यापरीक्षायां संस्कृतपत्रिकायामुत्तीर्णत्वम् ।

३. मुम्बयिनगरीयस्य भारतीयविद्याभवनस्य 'कोविदः' इति परीक्षायामुत्तीर्णत्वम् ।

४. शृङ्गगिरिस्थायाः श्रीसुरसरस्वतीसभायाः 'प्रवेशः' इति परीक्षायामुत्तीर्णत्वम् ।

५. बेङ्गळूरुनगरस्थायाः संस्कृतभारत्याः 'प्रवेशः' इति परीक्षायामुत्तीर्णत्वम् ।

६. दशमकक्ष्यायाः तत्समानकक्ष्याया वा परीक्षायामुत्तीर्णत्वम् ।

एतेषु अन्यतमा अर्हता अपेक्ष्यते ।

सूचना : सामान्यशिक्षणे ये तावद् दशमकक्ष्यायां संस्कृतं नापठन्
तेषां साहित्यस्य प्रवेशे कर्तव्ये संस्कृतज्ञाननिर्णयार्थं महाविद्यालयेन कार्यायां परीक्षायामुत्तीर्णत्वमनिवार्यम्

द्वितीयेवर्षेऽपि समवायेन षट् (६) पत्रिकाः पूर्ववत् । तासु आदिमं द्वयं भाषासम्बद्धम्, (प्रथमाभाषा संस्कृत–कन्नडयोः अन्यतमा, द्वितीयाभाषा पुनः आङ्ग्ल–हिन्दीभाषयोः अन्यतमा) भाषाविषये पदवीपूर्वकक्ष्याया द्वितीयवर्षस्य (PUC-II) यत्पाठ्यपुस्तकं तदेवात्रापि निर्णीतम् । ततः अन्यस्य पत्रिकाचतुष्टयस्य क्रमेण साहित्यसौरभम्–१, साहित्यसौरभम्–२, व्याकरणसौरभम्, तर्कसौरभं च पाठ्यपुस्तकत्वेन निर्णीतमस्ति । साहित्यप्रथमवर्षीयपरीक्षायाम् उत्तीर्णत्वमत्र प्रवेशनियमः ।

## २. शास्त्री/B.A.

अस्यां कक्ष्यायां द्वैतवेदान्तः, नवीनन्यायः, ज्यौतिषम्, अलङ्कारश्चेति चत्वारो विभागाः सन्ति । तेषु च्छात्रा यं कञ्चन स्वाभिलषितं विभागं चेतुमर्हन्ति । आधुनिकं राज्यशिक्षणनियमम् (द.उ.ठ) अवलम्ब्य कक्ष्येयं वर्षत्रयावधिकी । तदत्र प्रतिषाण्मासिकम् एका परीक्षा इति आहत्य षट् षाण्मासिक्यः परीक्षाः भवन्ति । अत्रायं प्रवेशनियमः –

१. साहित्यपरीक्षायामुत्तीर्णत्वम् ।

२. प्राक्शास्त्रि / प्राक्शिरोमणि / उत्तरमध्यमा / मध्यमा / उपशास्त्रिकक्ष्यास्वन्यतमायां तत्समानायां वा अन्यस्यां कस्याञ्चिदुत्तीर्णत्वम् ।

३.पदवीपूर्वपरीक्षा (PUC-II), विश्वविद्यालयीयसंस्कृतडिप्लोम, संस्कृतकोविदः, संस्कृतद्वितीयदीक्षा, संस्कृतविचक्षणः, आगमप्रवीणश्चैतासु परीक्षासु अन्यतमायामुत्तीर्णत्वम् ।

४. विश्वविद्यालयीयायां पदवीपरीक्षायां संस्कृतसहितायामुत्तीर्णत्वम् ।

५. विश्वविद्यालयीयस्नातकोत्तरपदवीपरीक्षायां संस्कृतसहितायाम् उत्तीर्णत्वम् ।

६. कन्नडपण्डितपरीक्षायामुत्तीर्णत्वम् ।

७. पदवीपूर्वकक्ष्यायाः (ठरइ–ऌल) परीक्षायामुत्तीर्णत्वम् ।

८. वेदमूलपरीक्षायामुत्तीर्णत्वम् ।

एतासु अन्यतमा अर्हता काङ्क्ष्यते ।

> सूचना : सामान्यशिक्षणे पदवीपूर्वकक्ष्यापरीक्षां संस्कृतरहितां ये उत्तीर्णाः तेषां शास्त्रिकक्ष्यायाः प्रवेशे कर्तव्ये संस्कृतज्ञाननिर्णयार्थं महाविद्यालयेन कार्यायां परीक्षायामुत्तीर्णत्वमनिवार्यम्

## ३. आचार्यः/M.A

अस्यां कक्ष्यायां द्वैतवेदान्तः, नवीनन्यायः, ज्यौतिषम्, अलङ्कारश्चेति चत्वारो विभागाः पूर्ववत् । कक्ष्येयं वर्षद्वयावधिकी । अत्र प्रथमे द्वितीये च वर्षे समवायेन तत्तच्छास्त्रसम्बद्धाः पञ्च पत्रिकाः सन्ति ।

अत्रायं प्रवेशनियमः –

१. समानजातीयायां वेदविभागीयायां वा शास्त्रिपरीक्षायामुत्तीर्णत्वम् ।

२. विद्वन्मध्यमापरीक्षायां तत्समानायां वा परीक्षायामुत्तीर्णत्वम् ।

३. संस्कृतसहिता पदवी (ऑ.अ ज्ळच.) स्नातकोत्तरपदवी वा (कअ. दध्ळ. ज्ळच.), शास्त्रान्तरीयविद्वन्मध्यमा, तत्समाना वा अन्या काचिदित्येतासु परीक्षासु अन्यतमायामुत्तीर्णत्वम् ।

४. शास्त्रान्तरीयायाम् आचार्यपरीक्षायाम्, तत्समानायां वा अन्यस्यां कस्याञ्चिच्छास्त्रीयपरीक्षायाम् उत्तीर्णत्वम् ।

एतासु अन्यतमा अर्हता अपेक्ष्यते ।

> सूचना : अत्र यः तृतीयः चतुर्थश्च नियमः तदनुसारेण प्रवेशे कर्तव्ये तत्तच्छास्त्रीयज्ञाननिर्णयार्थं महाविद्यालयेन कार्यायां परीक्षायामुत्तीर्णत्वम् अनिवार्यम्

## पाठ्यम्

### I. साहित्यम्

#### प्रथमवर्षम्

| पत्रिका | पाठ्यम् |
|---|---|
| १. संस्कृतम्/कन्नडम् | प्रथम पि.यु.सि पाठ्यपुस्तकम् |
| २. हिन्दी/आङ्ग्लम् | प्रथम पि.यु.सि. पाठ्यपुस्तकम् |
| ३. पद्यम्, गद्यम्, अलङ्कारादि | साहित्यसोपानम्–१. |
| ४. नाटकम्, चम्पूः, छन्दःप्रभृति | साहित्यसोपानम्–२. |
| ५. व्याकरणम् | व्याकरणसोपानम् |
| ६. तर्कः | तर्कसोपानम् |

#### द्वितीयवर्षम्

| पत्रिका | पाठ्यम् |
|---|---|
| १. संस्कृतम्/कन्नडम् | द्वितीय पि.यु.सि पाठ्यपुस्तकम् |
| २. हिन्दी/आङ्ग्लम् | द्वितीय पि.यु.सि. पाठ्यपुस्तकम् |
| ३. पद्यम्, गद्यम्, अलङ्कारादि | साहित्यसौरभम्–१. |
| ४. नाटकम्, चम्पूः, छन्दःप्रभृति | साहित्यसौरभम्–२. |
| ५. व्याकरणम् | व्याकरणसौरभम् |
| ६. तर्कः | तर्कसौरभम् |

## II. शास्त्री

अस्यां कक्ष्यायां द्वैतवेदान्तः, नवीनन्यायः, ज्यौतिषम्, अलङ्कारश्चेति चत्वारो विभागाः सन्ति । तेषु च्छात्त्रा यं कञ्चन विभागं स्वाभिमतं चेतुमर्हन्ति । आधुनिकं राज्यशिक्षणनियमम् (S.E.P) अवलम्ब्य कक्ष्येयं वर्षत्रयावधिकी । तदत्र प्रतिषाण्मासिकम् एका परीक्षा इति आहत्य षट् षाण्मासिक्यः परीक्षाः भवन्ति । अत्र प्रथमसत्त्रार्धम् आरभ्य चतुर्थसत्त्रार्धपर्यन्तं सप्त पत्त्रिकाः सन्ति । पञ्चमे षष्ठे च सत्त्रार्धे पञ्च पत्त्रिकाः सन्ति । उभयत्रापि अन्तिमं पत्रं पञ्चाशदात्मकम् । अन्येषु अशीतिः अङ्काः लेखनपरीक्षायां, विंशतिः अङ्काः आन्तरिकपरीक्षायामिति समवायेन शतमङ्काः । लघुपरीक्षा प्रबन्धः चेति विभागद्वये छात्राणां प्रावीण्यं परीक्ष्य विंशत्यङ्केषु तत्तद्विभागीयैः अध्यापकैः अङ्काः प्रदीयन्ते । तदेवं विंशतौ अङ्केषु आन्तरिकपरीक्षा प्रचलति । तस्मात् चतुर्थसत्त्रार्धपर्यन्तं परीक्षा पञ्चाशदधिकषट्शते (650) अङ्केषु भवति । पञ्चमे षष्ठे च सत्त्रार्धे पञ्चाशदधिकचतुश्शते (450) अङ्केषु परीक्षा भवति ।

## पाठ्यम्

### प्रथमा अर्धवर्षीया परीक्षा (Semester - I )

### १.द्वैतवेदान्तः

| पत्त्रिका | पाठ्यम् |
|---|---|
| १. पदार्थसङ्ग्रहः | प्रथमं चतुर्थञ्च प्रकरणम् |
| २. उपनिषद्भाष्यम् | ईश–केनोपनिषद्भाष्ये |
| ३. भगवद्गीताविवृतिः | चतुर्दशपञ्चदशाध्यायौ |
| ४. लघुसिद्धान्तकौमुदी | पञ्चसन्ध्यन्तप्रकरणम् |
| ५. संस्कृतभाषा | भारतसङ्ग्रहे आदिपर्व, अम्बेड्कर्शतकम् च |
| ६. कन्नडभाषा / आङ्ग्लभाषा | विश्वविद्यालयेन प्रकाशितो ग्रन्थः |
| ७. Constitutional Values | |

### २.नवीनन्यायः

| पत्त्रिका | पाठ्यम् |
|---|---|
| १. तर्कसङ्ग्रहशाब्दबोधः | मङ्गलश्लोकस्य शाब्दबोधमारभ्य वायुलक्षणपर्यन्तम् |
| २. न्या.सि.मुक्तावली | साधर्म्यवैधर्म्यप्रकरणसमाप्तिपर्यन्तम् |
| ३. विद्याधरी | आदितः मनोनिरूपणपर्यन्ता |
| ४. लघुसिद्धान्तकौमुदी | पञ्चसन्ध्यन्तप्रकरणम् |
| ५. संस्कृतभाषा | भारतसङ्ग्रहे आदिपर्व, अम्बेड्कर्शतकम् च |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन प्रकाशितो ग्रन्थः |
| ७. Constitutional Values | |

## ३.ज्यौतिषम्

| पत्रिका | पाठ्यम् |
|---|---|
| १. बृहज्जातकम् | १–५ अध्यायपर्यन्तभागः |
| २. सूर्यसिद्धान्तः | मध्यमाधिकारः |
| ३. ज्योतिषसोपानम् | प्रथमद्वितीयाध्यायौ |
| ४. लघुसिद्धान्तकौमुदी | पञ्चसन्ध्यन्तप्रकरणम् |
| ५. संस्कृतभाषा | भारतसङ्ग्रहे आदिपर्व, अम्बेड्करशतकम् च |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन प्रकाशितो ग्रन्थः |
| ७. Constitutional Values | |

## ४.अलङ्कारः

| पत्रिका | पाठ्यम् |
|---|---|
| १. साहित्यदर्पणः | प्रथमद्वितीयपरिच्छेदौ |
| २. कुवलयानन्दः | १–१५ अलङ्काराः |
| ३. पद्यकाव्यम् | रघुवंशे प्रथमः सर्गः |
| ४. लघुसिद्धान्तकौमुदी | पञ्चसन्ध्यन्तप्रकरणम् |
| ५. संस्कृतभाषा | भारतसङ्ग्रहे आदिपर्व अम्बेड्करशतकम् च |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन प्रकाशितो ग्रन्थः |
| ७. Constitutional Values | |

## द्वितीया अर्धवर्षीया परीक्षा (Semester - II )

## १.द्वैतवेदान्तः

| पत्रिका | पाठ्यम् |
|---|---|
| १. तत्वसङ्ख्यानम् | सटीकम्– पूर्णम् |
| २. उपनिषद्भाष्यम् | कठोपनिषद्भाष्यम् |
| ३. भगवद्गीताविवृतिः | षोडशः,सप्तदशश्च अध्यायः |
| ४. लघुसिद्धान्तकौमुदी | कारकसमासप्रकरणे |
| ५. संस्कृतभाषा | भारतसङ्ग्रहे सभापर्व, अभिनवप्रहेलिका (आदितः ३०पद्यानि), पार्वतीपरमेश्वरम् |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन प्रकाशितो ग्रन्थः |
| ७. Constitutional Values | |

## २.नवीनन्यायः

| | |
|---|---|
| १. तर्कसङ्ग्रहशाब्दबोधः | आकाशलक्षणतः आन्तम् |
| २. सिद्धान्तमुक्तावली | प्रत्यक्षे अवशिष्टो भागः |
| ३. विद्याधरी | गुणनिरूपणतः सन्निकर्षनिरूपणपर्यन्ता |
| ४. लघुसिद्धान्तकौमुदी | कारकसमासप्रकरणे |
| ५. संस्कृतभाषा | भारतसङ्ग्रहे सभापर्व, अभिनवप्रहेलिका (आदितः ३०पद्यानि), पार्वतीपरमेश्वरम् |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन प्रकाशितो ग्रन्थः |
| ७. Constitutional Values | |

## ३.ज्यौतिषम्

| **पत्रिका** | **पाठ्यम्** |
|---|---|
| १. बृहज्जातकम् | ६–१२ अध्यायपर्यन्तभागः |
| २. सूर्यसिद्धान्तः | स्पष्टाधिकार–त्रिप्रश्नाधिकारौ |
| ३. ज्यौतिषसोपानम् | तृतीयचतुर्थाध्यायौ |
| ४. लघुसिद्धान्तकौमुदी | कारकसमासप्रकरणे |
| ५. संस्कृतभाषा | भारतसङ्ग्रहे सभापर्व, अभिनवप्रहेलिका (आदितः ३०पद्यानि), पार्वतीपरमेश्वरम् |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन प्रकाशितो ग्रन्थः |
| ७. Constitutional Values | |

## ४.अलङ्कारः

| **पत्रिका** | **पाठ्यम्** |
|---|---|
| १. साहित्यदर्पणः | तृतीयपरिच्छेदः (तत्र निर्दिष्टो भागः) |
| २. कुवलयानन्दः | १६–३० अलङ्काराः |
| ३. पद्यकाव्यम् | किरातार्जुनीये प्रथमः सर्गः |
| ४. लघुसिद्धान्तकौमुदी | कारकसमासप्रकरणे |
| ५. संस्कृतभाषा | भारतसङ्ग्रहे सभापर्व, अभिनवप्रहेलिका (आदितः ३०पद्यानि), पार्वतीपरमेश्वरम् |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन प्रकाशितो ग्रन्थः |
| ७. Constitutional Values | |

# तृतीया अर्धवर्षीया परीक्षा (Semester - III )

## १.द्वैतवेदान्तः

| पत्रिका | पाठ्यम् |
|---|---|
| १. प्रमाणपद्धतिः | प्रत्यक्षप्रकरणम्, अनुमाने व्यतिरेकव्याप्तिपर्यन्तम् |
| २. उपनिषद्भाष्यम् | अथर्वणोपनिषद्भाष्यम् |
| ३. युक्तिमल्लिका | फलसौरभे आद्याः ५० श्लोकाः |
| ४. तर्कसङ्ग्रहः | न्यायबोधिनीसहितः (आदितः प्रत्यक्षखण्डसमाप्तिपर्यन्तम्) |
| ५. संस्कृतम् | चम्पूरामायणम् – सुन्दरकाण्डम् |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन निर्दिष्टो भागः |
| ७. practical Knowledge/Skill | |

## २.नवीनन्यायः

| पत्रिका | पाठ्यम् |
|---|---|
| १. पञ्चलक्षणी | आदितः तृतीयलक्षणसमाप्तिपर्यन्ता |
| २. सिद्धान्तमुक्तावली | दिनकरीसहिता – अनुमानोपमानखण्डे |
| ३. न्यायकन्दली | आदितः साधर्म्यवैधर्म्यसमाप्तिपर्यन्तम् |
| ४. तर्कसङ्ग्रहः | न्यायबोधिनीसहितः (आदितः प्रत्यक्षखण्डसमाप्तिपर्यन्तम्) |
| ५. संस्कृतम् | चम्पूरामायणम् – सुन्दरकाण्डम् |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन निर्दिष्टो भागः |
| ७. practical Knowledge/Skill | |

## ३.ज्यौतिषम्

| पत्रिका | पाठ्यम् |
|---|---|
| १. बृहज्जातकम् | १३–२० अध्यायपर्यन्तभागः |
| २. सूर्यसिद्धान्तः | चन्द्रग्रहणसूर्यग्रहणछेद्यकाधिकारः |
| ३. लीलावती | आदितः इष्टकर्मपर्यन्तम् |
| ४. तर्कसङ्ग्रहः | न्यायबोधिनीसहितः (आदितः प्रत्यक्षखण्डसमाप्तिपर्यन्तम्) |
| ५. संस्कृतम् | चम्पूरामायणम् – सुन्दरकाण्डम् |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन निर्दिष्टो भागः |
| ७. practical Knowledge/Skill | |

## ४.अलङ्कारः

| पत्रिका | पाठ्यम् |
|---|---|
| ३. साहित्यदर्पणः | चतुर्थपञ्चमपरिच्छेदौ |
| ४. कुवलयानन्दः | ३१–५५ अलङ्काराः |
| ५. लघुवृत्तरत्नाकरः | आदितः समाप्तिं यावत् |
| ४. तर्कसङ्ग्रहः | न्यायबोधिनीसहितः (आदितः प्रत्यक्षखण्डसमाप्तिपर्यन्तम्) |
| ५. संस्कृतम् | चम्पूरामायणम् – सुन्दरकाण्डम् |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन निर्दिष्टो भागः |
| ७. practical Knowledge/Skill | |

# चतुर्थी अर्धवर्षीया परीक्षा (Semester - IV )

## १.द्वैतवेदान्तः

| पत्रिका | पाठ्यम् |
|---|---|
| १. प्रमाणपद्धतिः | अवशिष्टभागः जातिनिग्रहस्थानवर्ज्यम् |
| २. उपनिषद्भाष्यम् | षट्प्रश्नमाण्डूक्योपनिषद्भाष्ये |
| ३. युक्तिमल्लिका | फलसौरभे ५१–१०० श्लोकाः |
| ४. तर्कसङ्ग्रहः | (न्यायबोधिनीसहितः) अनुमानखण्डतः ग्रन्तसमाप्तिपर्यन्तो भागः |
| ५. संस्कृतम् | अभिज्ञानशाकुम्तलम् ४,५ अङ्कौ |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन निर्दिष्टो भागः |
| ७. practical Knowledge/Skill | |

## २.नवीनन्यायः

| पत्रिका | पाठ्यम् |
|---|---|
| ३. पञ्चलक्षणी | चतुर्थपञ्चमलक्षणे |
| ४. सिद्धान्तमुक्तावली | शब्दखण्डः (दिनकरीसहिता) |
| ५. न्यायकन्दली | द्रव्यनिरूपणादारभ्य सृष्टिसंहारप्रकरणान्ता |
| ४. तर्कसङ्ग्रहः | (न्यायबोधिनीसहितः) अनुमानखण्डतः ग्रन्तसमाप्तिपर्यन्तो भागः |
| ५. संस्कृतम् | अभिज्ञानशाकुम्तलम् ४,५ अङ्कौ |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन निर्दिष्टो भागः |
| ७. practical Knowledge/Skill | |

## ३.ज्यौतिषम्

| पत्रिका | पाठ्यम् |
|---|---|
| १. बृहज्जातकम् | २१–२८ अध्यायपर्यन्तभागः |
| २. सूर्यसिद्धान्तः | ग्रहयुत्यधिकारतः पाताधिकारपर्यन्तम् |
| ३. बीजगणितम् | आदितः करणीषड्विधपर्यन्तम् |
| ४. तर्कसङ्ग्रहः | अनुमानखण्डतः ग्रन्तसमाप्तिपर्यन्तो भागः (न्यायबोधिनीसहितः) |
| ५. संस्कृतम् | अभिज्ञानशाकुम्तलम् ४,५ अङ्कौ |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन निर्दिष्टो भागः |
| ७. practical Knowledge/Skill | |

## ४.अलङ्कारः

| पत्रिका | पाठ्यम् |
|---|---|
| ३. साहित्यदर्पणः | षष्ठःपरिच्छेदे निर्दिष्टो भागः |
| ४. कुवलयानन्दः | ५६–८० अलङ्काराः |
| ५. कविकण्ठाभरणम्–काव्यमीमांसा च | (१४,१५,१६ अध्यायाः) |
| ४. तर्कसङ्ग्रहः | अनुमानखण्डतः ग्रन्तसमाप्तिपर्यन्तो भागः (न्यायबोधिनीसहितः) |
| ५. संस्कृतम् | अभिज्ञानशाकुम्तलम् ४,५ अङ्कौ |
| ६. कन्नडभाषा/ आङ्ग्लभाषा | विश्वविद्यालयेन निर्दिष्टो भागः |
| ७. practical Knowledge/Skill | |

# पञ्चमी अर्धवर्षीया परीक्षा (Semester - V )

## १.द्वैतवेदान्तः

| पत्रिका | पाठ्यम् |
|---|---|
| १. गीताभाष्यम् | प्रथमाध्यायः, द्वितीयाध्याये २३ श्लोकपर्यन्तम् |
| २. उपनिषद्भाष्यम् | छान्दोग्योपनिषद्भाष्ये षष्ठाध्यायः |
| ३. तत्वोद्योतः | अर्थापत्तिप्रमाणनिरासान्तम् |
| ४. स्वशास्त्रेतिहासः | |
| ५. Internship | |

## २.नवीनन्यायः

| पत्रिका | पाठ्यम् |
|---|---|
| १. सिद्धान्तलक्षणम् | आदितः अत्यन्तपदकृत्यनिरूपणपर्यन्तम् |
| २. चतुर्दशलक्षणी | अवतरणिकाभागतः व्यापकतायाः एकदैव निवेशप्रकारप्रदर्शनपर्यनो भागः |
| ३. अवयवः | न्यायलक्षणम्,अवयवलक्षणे उभयघटकभागद्वयघटितत्वपरिष्कारपर्यन्तम् |
| ४. स्वशास्त्रेतिहासः | |
| ५. Internship | |

## ३.ज्यौतिषम्

| पत्रिका | पाठ्यम् |
|---|---|
| १.केतकीग्रहगणितम् | आदितः पञ्चाङ्गगणितपर्यन्तम् |
| २.फलदीपिका | ६ तः१२ अध्यायाः |
| ३.मुहूर्तचिन्तामणिः | १,२,३ अध्यायाः |
| ४. स्वशास्त्रेतिहासः | |
| ५. Internship | – |

## ४.अलङ्कारः

| पत्रिका | पाठ्यम् |
|---|---|
| १. साहित्यदर्पणः | सप्तमपरिच्छेदः |
| २. कुवलयानन्दः | ८१तः समाप्तिं यावत् अलङ्काराः |
| ३. औचित्यविचारचर्चा | आदितः रसौचित्यसमाप्तिं यावत् |
| ४. स्वशास्त्रेतिहासः | |
| ५. Internship | |

## षष्ठी अर्धवर्षीया परीक्षा (Semester - VI )

## १.द्वैतवेदान्तः

| पत्रिका | पाठ्यम् |
|---|---|
| १. गीताभाष्यम् | द्वितीयाध्याये २४ तः ५०श्लोकपर्यन्तम् |
| २. उपनिषद्भाष्यम् | बृहदारण्यकोपनिषद्भाष्ये पञ्चमोऽध्यायः |
| ३. तत्वोद्योतः | शून्यवादमायावादसाम्योपपादनपर्यन्तम् |
| ४. भारतीयदर्शनानि | |
| ५. Research Methodology with Servey project | |

## २.नवीनन्यायः

| पत्रिका | पाठ्यम् |
|---|---|
| १. सिद्धान्तलक्षणम् | अवशिष्टो भागः |
| २. चतुर्दशलक्षणी | साध्यतावच्छेदक.. इत्यारभ्य द्वितीयस्वलक्षणसमाप्तिपर्यन्तम् |
| ३. अवयवः | मण्युक्तावयवलक्षणम्.... इत्यादिः निर्दिष्टो भागः |
| ४. भारतीयदर्शनानि | |
| ५. Research Methodology with Servey project. | |

## ३.ज्यौतिषम्

| पत्रिका | पाठ्यम् |
|---|---|
| १. केतकीग्रहगणितम् | चन्द्रग्रहणसूर्यग्रहणाधिकारौ |
| २. फलदीपिका | १३–२० अध्यायाः |
| ३. मुहूर्तचिन्तामणिः | ४,५,६ अध्यायाः |
| ४.भारतीयदर्शनानि | |
| ५. Research Methodology with Servey project | |

## ४.अलङ्कारः

| पत्रिका | पाठ्यम् |
|---|---|
| १. साहित्यदर्पणः | अष्टमनवमपरिच्छेदौ ,दशमे शब्दालङ्काराः |
| २. वक्रोक्तिजीवितम् | आदितः २१ तमकारिकाव्याख्यासमापिं यावत् |
| ३. औचित्यविचारचर्चा | क्रियौचित्यतः समाप्तिं यावत् |
| ४. भारतीयदर्शनानि | |
| ५. Research Methodology with Servey project | |

## III. आचार्यः

आचार्यकक्ष्यायां द्वैतवेदान्तः, नवीनन्यायः, ज्यौतिषम्, अलङ्कारश्चेति शास्त्रिकक्ष्यायामिव चत्वारि शास्त्राणि सन्ति । आधुनिकं राष्ट्रीयशिक्षणनियमम् (N.E.P) अवलम्ब्य कक्ष्येयं वर्षद्वयावधिकी । तदत्र प्रतिषाण्मासिकम् एका परीक्षा इति आहत्य चतस्रः षाण्मासिक्यः परीक्षाः भवन्ति । प्रत्येकस्मिन्नपि सत्रार्धे पञ्च पत्रिकाः सन्ति, यासु लेखनपरीक्षायाः सप्ततिः (७०), आन्तरिकाश्च त्रिंशदिति (३०) समवायेन शतमङ्काः ।

## पाठ्यम्

### * द्वैतवेदान्तः

### प्रथमा अर्धवर्षीया परीक्षा (Semester - I)

| पत्रिका | पाठ्यम् |
|---|---|
| १. ब्रह्मसूत्रभाष्यम् | प्रथमाध्याये प्रथमपादे तत्त्वप्रकाशिकासहितम्, प्रथमे द्वितीयपादे भाष्यमात्रम् |
| २. ब्रह्मसूत्रभाष्यम् | प्रथमाध्याये आनन्दमयाधिकरणात् प्रथमपादसमाप्तिं यावत् – तत्त्वप्रकाशिकासहितम्प्रथमाध्याये तृतीयः पादः – भाष्यमात्रम् |
| ३. विष्णुतत्त्वनिर्णयः | वेदापौरुषेयत्ववादसमाप्तिं यावत् |
| ४. न्यायसुधा | ओतत्त्ववाची ह्योङ्कार इत्यतः प्राक् १.१.१ |
| ५. धर्मशास्त्रस्य भाषा | समग्रम् |

### द्वितीया अर्धवर्षीया परीक्षा (Semester - II )

| | |
|---|---|
| १. ब्रह्मसूत्रभाष्यम् | भाष्यमात्रम् – चतुर्थोऽध्यायः |
| २. ब्रह्मसूत्रभाष्यम् | प्रथमाध्याये चतुर्थः पादः – तत्त्वप्रकाशिकासहितः |
| ३. विष्णुतत्त्वनिर्णयः | प्रामाण्यवादाद्वर्णनित्यत्ववादं यावत् |
| ४. न्यायसुधा | ओतत्त्ववाचीत्यतो बन्धमिथ्यात्वं यावत् |
| ५. षड्दर्शनसमुच्चयः | बौद्धसाङ्ख्यन्यायदर्शनानि |

### तृतीया अर्धवर्षीया परीक्षा (Semester - III )

| | |
|---|---|
| १. ब्रह्मसूत्रभाष्यम् | भाष्यमात्रम्, द्वितीयाध्याये प्रथमद्वितीयौ पादौ – भाष्यमात्रम् |
| २. ब्रह्मसूत्रभाष्यम् | भाष्यमात्रम्, द्वितीयाध्याये तृतीयचतुर्थौ पादौ – भाष्यमात्रम् |
| ३. न्यायामृतम् | पञ्चममिथ्यात्वसमाप्तिपर्यन्तम् |
| ४. न्यायसुधा | असद्विलक्षणज्ञप्त्यै इत्यारभ्य प्रत्यक्षवच्च प्रामाण्यम्' इत्यतः प्राक् |
| ५. Dissertation | |

### चतुर्थी अर्धवर्षीया परीक्षा (Semester - IV) Desartation

| | |
|---|---|
| १. ब्रह्मसूत्रभाष्यम् | भाष्यमात्रम्, तृतीयाध्याये प्रथमद्वितीयौ पादौ–भाष्यमात्रम् |
| २. ब्रह्मसूत्रभाष्यम् | भाष्यमात्रम्, तृतीयाध्याये तृतीयचतुर्थौ पादौ भाष्यमात्रम् |
| ३. न्यायामृतम् | सामान्यतो मिथ्यात्वभङ्गमारभ्य सोपाधिकत्वसमर्थनं यावत् |
| ४. न्यायसुधा | प्रत्यक्षवच्च प्रामाण्यम्' इत्यतः जिज्ञासाधिकरणसमाप्तिं यावत् |
| ५. Internship | |

## * नवीनन्यायः

### प्रथमा अर्धवर्षीया परीक्षा (Semester - I)

| | |
|---|---|
| १. व्युत्पत्तिवादः | आदितो मुखं चन्द्र इति रूपकालङ्कारबोधं यावत् |
| २. शक्तिवादः | विशेषकाण्डः– तच्छब्दशक्तिनिरूपणपर्यन्तः |
| ३. सामान्यनिरुक्तिः | प्रथमं लक्षणम् |
| ४. प्रामाण्यवादः | आदितः तदप्रामाण्याग्राहकेत्यत्र तत्पदस्य कृत्यनिरूपणपर्यन्तम् |
| ५. धर्मशास्त्रस्य भाषा | समग्रम् |

### द्वितीया अर्धवर्षीया परीक्षा (Semester - II)

| | |
|---|---|
| १. व्युत्पत्तिवादः | द्वितीयाकारके पुष्पं जिघ्रति इति वाक्यार्थपर्यन्तम् |
| २. शक्तिवादः | युष्मदस्मत्पदयोः शकिवादमारभ्य विशेषकाण्डसमाप्तिं यावत् |
| ३. सामान्यनिरुक्तिः | द्वितीयं लक्षणम् – विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वेन इति दीधितिग्रन्थपर्यन्तम् |
| ४. प्रामाण्यवादः | अवशिष्टः प्रथमाविप्रतिपत्तिसमाप्तिपर्यन्तो भागः |
| ५. षड्दर्शनसमुच्चयः | बौद्धसाङ्ख्यन्यायदर्शनानि |

### तृतीया अर्धवर्षीयपरीक्षा (Semester - III)

| | |
|---|---|
| १. शब्दशक्तिप्रकाशिका | आदितो निपातलक्षणं यावत् |
| २. सव्यभिचारः | प्रथमलक्षणं |
| ३. सामान्यनिरुक्तिः | नच चतुष्टयतः पक्षतावच्छेदकवैशिष्ट्यञ्च वैज्ञानिकम् इति मूलपर्यन्तम् |
| ४. सत्प्रतिपक्षः | दूषकताबीजन्तु इति मणिपर्यन्तः |
| ५. Dissertation | |

### चतुर्थी अर्धवर्षीयपरीक्षा (Semester - IV)

| | |
|---|---|
| १. शब्दशक्तिप्रकाशिका | वाक्यनिरूपणादारभ्य पारिभाषिक्यादिसंज्ञावर्णं यावत् |
| २. सव्यभिचारः | अवशिष्टो भागः |
| ३. मुक्तिवादः | समग्रम् |
| ४. तर्कताण्डवम् | समासार्थवादाध्याहारवादौ |

# * ज्यौतिषम्

## प्रथमा अर्धवर्षीयपरीक्षा (Semester - I)

| | |
|---|---|
| १. सिद्धान्तशिरोमणिः | आदितो मध्यमाधिकारं यावत् |
| २. गोलाध्यायः | आदितो मध्यमगतिवासनां यावत् |
| ३. श्रीपतिपद्धतिः | १,२,३ अध्यायाः |
| ४. प्रश्नमार्गः | १–८ अध्यायाः |
| ५. धर्मशास्त्रस्य भाषा | समग्रम् |

## द्वितीया अर्धवर्षीया परीक्षा (Semester - II)

| | |
|---|---|
| १. सिद्धान्तशिरोमणिः | स्पष्टाधिकारः, त्रिप्रश्नाधिकारे अक्षक्षेत्रपर्यन्तम् |
| २. गोलाध्यायः | ज्योत्पत्तितो गोलबन्धाधिकारं यावत् |
| ३. श्रीपतिपद्धतिः | ४–८ अध्यायाः |
| ४. प्रश्नमार्गः | ९–१६ अध्यायाः |
| ५. षड्दर्शनसमुच्चयः | बौद्धसाङ्ख्यन्यायदर्शनानि |

## तृतीया अर्धवर्षीयपरीक्षा (Semester - III)

| | |
|---|---|
| १. सिद्धान्तशिरोमणिः | पर्वसम्भवात् सूर्यग्रहणं यावत् |
| २. गोलाध्यायः | त्रिप्रश्नवासनातो दृक्कर्मवासनां यावत् |
| ३. बृहत्संहिता | १–१० अध्यायाः |
| ४. प्रश्नमार्गः | १७–२४ अध्यायाः |
| ५. Dissertation | |

## चतुर्थी अर्धवर्षीयपरीक्षा (Semester - IV) Dissertation Internship

| | |
|---|---|
| १. सिद्धान्तशिरोमणिः | ग्रहच्छायाधिकारात् पाताधिकरणं यावत् |
| २. गोलाध्यायः | शृङ्गोन्नतिवासनात ऋतुवर्णनं यावत् |
| ३. बृहत्संहिता | ११–१३, ५३–६० अध्यायाः |
| ४. प्रश्नमार्गः | २५–३२ अध्यायाः |
| ५. Internship | |

# * अलङ्कारः

## प्रथमा अर्धवर्षीयपरीक्षा (Semester - I)

| | |
|---|---|
| १. रसगङ्गाधरः | प्रथमानने रसवादः–'एवं च संक्षेपेण निरूपिता रसाः'इति यावत् |
| २. ध्वन्यालोकः | प्रथम उद्‌द्योतः |
| ३. प्राकृतप्रकाशः | १–४ परिच्छेदाः |
| ४. वक्रोक्तिजीवितम् | प्रथमोन्मेषे वाक्यस्य वक्रभावोऽन्य इति कारिकातः पूर्वं यावत् |
| ५. धर्मशास्त्रस्य भाषा | समग्रम् |

## द्वितीया अर्धवर्षीयपरीक्षा (Semester - II)

| | |
|---|---|
| १. रसगङ्गाधरः | प्रथमानने उर्वरितो भागः |
| २. ध्वन्यालोकः | द्वितीय उद्‌द्योतः |
| ३. प्राकृतप्रकाशः | ५,६,७,८ परिच्छेदाः |
| ४. वक्रोक्तिजीवितम् | प्रथमोन्मेषे अवशिष्टः भागः |
| ५. षड्दर्शनसमुच्चयः | बौद्धसाङ्ख्यन्यायदर्शनानि |

## तृतीया अर्धवर्षीयपरीक्षा (Semester - III)

| | |
|---|---|
| १. रसगङ्गाधरः | द्वितीयानने उपमालङ्कारतः अनन्वयपर्यन्तम् |
| २. ध्वन्यालोकः | तृतीय उद्‌द्योतः–प्रकारोऽन्यो गुणीभूत . इति कारिकातः प्राक्तनोभागः |
| ३. औचित्यविचारचर्चा | रसौचित्यसमाप्तिं यावत् |
| ४. सेतुबन्धः | प्रथमद्वितीयाश्वासौ |
| ५. Dissertation | |

## चतुर्थी अर्धवर्षीयपरीक्षा (Semester - IV)

| | |
|---|---|
| १. रसगङ्गाधरः | द्वितीयानने असमालङ्कारात् रूपकनिरूपणसमाप्तिं यावत् |
| २. ध्वन्यालोकः | तृतीय उद्‌द्योते अवशिष्टःभागः,चतुर्थोद्द्योतश्च |
| ३. औचित्यविचारचर्चा | अवशिष्टः भागः |
| ४. काव्यालङ्कारसूत्राणि | १,५ अधिकरणम् |
| ५. Internship | |

# छात्रैः अवधेयाः आंशाः छात्राणां नियमाश्च

१. संस्कृतेन सम्भाषणं कौशलवर्धने कामधेनुः । विषयेऽस्मिन् आचार्यकक्ष्याच्छात्राः शिक्षकाश्च स्वयं निदर्शनीभूताः सन्तोऽन्यान् संस्कृतेन सम्भाषणे चोदयेयुः ।

२. महाविद्यालये चलदूरवाण्याः (मोबैल्) उपयोगो निषिद्धः । यदि सा उपयुज्यमाना विलोक्यते तर्हि सपद्येव तां स्वीकृत्य कार्यालये स्थाप्यते, शैक्षणिकवर्षे समाप्ते सति दास्यते ।

३. अ) प्रातस्तने मङ्गलपारायणे सर्वेषां छात्राणां काले उपस्थितिः, पङ्क्तिषु पङ्क्त्यन्तरसमसंख्याकतया उपवेशनम्, पारायणोचितपुस्तकस्य चानयनमपेक्ष्यते ।

इ) रुचिरभारती–काव्यशास्त्रविचारपरिषदादेः सभासु सर्वे काले उपस्थिताः सन्त आसमाप्ति तिष्ठेयुः ।

उ) कक्ष्यायाः सर्वेष्वपि अवधिषु काल एवोपस्थितिः शोभते ।

४. उपरिष्टान्निर्दिष्टेषु सर्वेष्वपि प्रसङ्गेषु विलम्बेन आगमनं महतेऽपराधाय । तच्च केवलं कूर्मवंशजानां गड्डुरिकावंशजानां वा शोभनम्, नान्येषाम् । मध्येसभं निर्गमनमित्यादिना यदव्यवस्थितत्वं तदुन्मत्तत्वस्य सूचकम् । चापलं मर्कटानां धर्मो न तु पुंसाम् । तस्मात्तद् यत्नेन वारणीयम् । प्रागुक्ते पारायणे, सभायाम्, बोधनकक्ष्यायां च शते अवरतः पञ्चसप्ततौ (७५) दिनेषु उपस्थितिः नियम्यते । शतीया उपस्थितिः पञ्चसप्ततिरिति यावत् । यद्युपस्थितिः ततो न्यूना तर्हि यु.जि.सि.नियमानुसारेण परीक्षायां प्रवेशपत्त्रं निराक्रियते, भाविनि च वर्षे विद्यार्थिनिलयादिसौकर्यं तस्य न लभ्येत । आधिक्यं तु गुणाय ।

शते पञ्चसप्ततिरिति उपस्थितेः गणनं वार्षिकेषु पाठनदिनेषु, न तु प्रातिमासिकेषु । तेन वर्षे यदि पाठनदिनानि २०० तर्हि सार्धशतं (१५०) दिनेषु उपस्थितिर्नियमेन । अथ तानि ततोऽप्यधिकानि न्यूनानि वा भवन्ति तर्हि त्रैराशिकगणितेन तदनुगुणानि उपस्थितिदिनानि निर्णेतव्यानि ।

५. यदि अध्यापका अनुपस्थिताः तर्हि छात्राः कक्ष्यायामुपविष्टाः 'श्व एव परीक्षा' इति मनसि कुर्वन्तो गाढमध्ययनं कुर्युः । क्षणशः कणशश्च विद्यामर्थं साधयेद्विवेकी । न्याये व्याकरणे च विशेषतः श्रमो भाषायां नियमेन सौष्ठवं प्रागल्भ्यं चादधातीति तत्र विशिष्याभिनिवेशः प्रशस्यते ।

६. वर्षे द्वे लघ्व्यौ परीक्षे विधास्येते । तत्रानुपस्थितिः धनादिना दण्ड्यत्वे हेतुः । शास्त्रिकक्ष्याणाम् आचार्यकक्ष्याणाञ्च अर्धवर्षीया परीक्षापद्धतिरिति हेतोः (दज्प्त्ल्ळज्प् उस्प्प् दहल्ळज्प्) परीक्षासु अनुपस्थितिः महतेऽनर्थाय, यत शास्त्रिकक्ष्याणाम् आन्तरिकेषु विंशति (२०)अङ्केषु दश अङ्काः, आचार्यकक्ष्याणाञ्च आन्तरिकेषु त्रिंशति (३०) अङ्केषु दश अङ्का लघुपरीक्षाम् अवलम्ब्यैव निर्णीयन्ते । यदि पुनः बलवता कारणेनानुपस्थितिः तर्हि सत्यां शिक्षकाणामनुमतौ पाठ्येतरसमये सा परीक्षा कर्तव्या भविष्यति ।

७. छात्रा रुचिरभारतीसभायां भाषणे, शलाकादिस्पर्धासंनाहप्रदर्शने, गाने, प्रहसने, कवने, तथाविधे चान्यस्मिन् प्रकारे स्वकीयं कौशलं प्रदर्शयेयुः ।

८. रुचिरभारत्यादिषु विभागेषु छात्रा यस्मिन् विभागे सन्ति तत्र सर्वजनश्लाघ्यतया क्रियावन्तो भवेयुः ।

९. राज्यस्तरादिषु स्पर्धासु भागग्राहिणः छात्त्रा यावच्छक्ति प्रयतमानाः प्रथमादिस्थानं प्राप्नुयुः । अनेन यथा स्वस्य यशो भविष्यति तथा महाविद्यालयस्यापि ।

१०. विरामपत्त्रस्य प्रदर्शनं सर्वेषामनिवार्यम् । स्वकीये परिचयपुस्तके प्रतिनियते स्थले विरामसम्बन्धि विवरणं यथानिर्देशं कुर्युः । चत्वारिंशत्पृष्ठात्मकं पुस्तकमन्यत्क्रीत्वा तदीयमेव पृष्ठं विरामविवरणलेखनार्थमुपयुज्य प्राचार्याय दद्युः । परिचयपुस्तके प्राचार्यस्य हस्ताङ्कने सत्येव कक्ष्यां प्रति प्रवेशः । (विरामपत्त्रस्य निदर्शनमत्रैव अग्रे प्रदर्शितम्)

११. छात्त्रा भवनस्य अन्तः पादरक्षां न नयेयुः ।

१२. महाविद्यालयस्य आसनादीनि वस्तूनि न दूषयेयुः । नहि विद्याप्रकाशाभिलाषी कश्चित् विवेकी सरस्वत्या भवनं मलिनयितुं प्रवर्तते । रूपकप्रशिक्षणाद्यवसरे अव्यवस्थितानि च न स्थापयेयुः ।

१३. आचार्यकक्ष्याणां छात्त्राणामङ्कानां शते सप्ततिः (७०) प्रसिद्धपरीक्षायाः, त्रिंशच्च (३०) लघुपरीक्षाप्रभृतेः । तेषु लघुपरीक्षाया दश (१०) अङ्काः, प्रबन्धद्वयस्य दश (१०), वाक्यार्थगोष्ठ्याश्च दश (१०) इति विभागः । शास्त्रिकक्ष्याणां छात्त्राणां तु शते अशीतिः (८०) प्रसिद्धपरीक्षायाः, विंशतिश्च (२०) लघुपरीक्षाप्रभृतेः । तेषु लघुपरीक्षाया दश (१०) अङ्काः, प्रबन्धस्य दश (१०) इति विभागः । तदर्थं सर्वेऽपि लघुपरीक्षायां सश्रद्धा भवेयुः, पूर्वमेव स्वस्वशिक्षकात् शीर्षकमवाप्य प्रबन्धं यथाकालं विलिख्य दद्युः, रुचिरभारतीसभासु अवरतो भाषणद्वयं च कुर्युः । शलाकास्पर्धायां भागग्रहणे तु प्रागुक्तं भाषणं नापेक्ष्यते । विलम्बनमौदासीन्यं चानर्थाय ।

१४. साहित्यकक्ष्याया द्वितीयवर्षाणां छात्त्राणां परीक्षा प्रायेण फेब्रवरिमासे भविष्यति । परीक्षासमाप्तौ सत्यां व्युत्पत्तिवर्धनदृष्ट्या मार्चमासस्य पञ्चदशं दिनाङ्कं यावत्पुनरपि पाठनं विधास्यते । तत्र तेषामुपस्थितिः अपरिहार्या । साहित्यकक्ष्याच्छात्त्राणां परीक्षारम्भदिनात् पूर्वम् अध्ययनार्थं पञ्चदशाधिकानि विंशत्यवराणि दिनानि प्रकल्प्यन्ते । तदन्येषां छात्त्राणां तु अर्धवर्षीया परीक्षेति हेतोः केवलं दशाधिकानि पञ्चदशावराणीति विशेषः ।

१५. शैक्षणिकवर्षस्य अन्ते सर्वेऽपि छात्त्रा ग्रन्थालयस्य पुस्तकं नियमेन प्रतिनिवर्तयेयुः । नो चेद्दण्डो भविष्यति ।

१६. स्वच्छत्वं परिपूर्णतायाः सूचकम्, समग्रसमाजस्य स्वाभिमुखं समाकर्षणे च साधनम् । तस्मात्सर्वेऽपि छात्त्राः शुभ्रवेषाः संस्कृतवेषाश्च भवेयुः, स्वां स्वां कक्ष्यां स्वच्छां दर्शनीयां व्यवस्थितासनां च विदध्युः ।

१७. छात्त्राः तथा वर्तेरन् यथा स्वसत्तया महाविद्यालयस्य काचिदुन्नतिर्भवेत्, समत्वं वान्ततः । न पुनरवनतिः ।

१८. कक्ष्यासमाप्तौ सत्यां दीपव्यजनादेः निर्वापणं प्रशस्तम् । वृथा विद्युतो व्ययः संस्थाया राष्ट्रस्य चावनतये ।

१९. छात्त्राः सर्वदा निर्दिष्टं वस्त्रं धरेयुः । उचितिनैव वेषेण शोभते नरः नानुचितेन ।

# विरामपत्त्रस्य निदर्शनम्

रमेशः
क्र.सं.–८१, अलङ्कारशास्त्री–१.
श्री.म.सि.प्र.संस्कृतमहाविद्यालयः
उडुपी–५७६१०१.– सकाशात्

माननीयः प्राचार्यः
श्री.म.सि.प्र.संस्कृतमहाविद्यालयः
उडुपी–५७६१०१.– सन्निधौ

अयि भोः!

अहमस्मिन् मासे २४ तमे दिनाङ्के (एकं दिनम्) / २४ तमात् दिनाङ्कात् २८ तमं दिनाङ्कं यावत् (समवायेन पञ्च दिनानि) शिरोवेदनया / उदरवेदनया / पितुः अस्वास्थ्येन / मातुलविवाहेन / पितामहस्य मरणेन / चिकित्सालयं प्रति गमनेन / ग्रामं प्रति गमनेन कक्ष्यायाम् अनुपस्थित आसम् । तदिमामनुपस्थितिं तत्रभवान् क्षाम्यतु ।

स्थलम् : उडुपी
दिनाङ्कः : २५/२९.६.२०१७

इति विधेयो विद्यार्थी
(हस्ताङ्कनम्)

**नाम :** **कक्ष्या :** **क्रमसंख्या :**

| क्र.सं | कस्मात् दिनाङ्कात् | कं दिनाङ्कं यावत् | कति दिनानि/ अवधयः | कारणम् | प्राचार्यस्य हस्ताङ्कनम् | बोधकानां हस्ताङ्कनम् | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | १ | २ | ३ | ४ | ५ | ६ |
| १ | २४.६. | २८.६ | १दिनम्/२अवधी | शिरोवेदना/मातामहस्य मरणम्/उदरवेदना | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |

**नाम :** **कक्ष्या :** **क्रमसंख्या :**

| क्र.सं | कस्मात् दिनाङ्कात् | कं दिनाङ्कं यावत् | कति दिनानि/ अवधयः | कारणम् | प्राचार्यस्य हस्ताङ्कनम् | बोधकानां हस्ताङ्कनम् | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | १ | २ | ३ | ४ | ५ | ६ |
| १ | २४.६. | २८.६ | १दिनम्/२अवधी | शिरोवेदना/मातामहस्य मरणम्/उदरवेदना | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |
| | | | | | | | | | | | |

## SEMESTER - I

| क्र.सं. | विषयः | प्रबन्धस्य नाम | अध्यापकानां हस्ताङ्कनम् |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |

विभागाध्यक्षस्य हस्ताङ्कनम्

प्राचार्यस्य हस्ताङ्कनम्

## SEMESTER - II

| क्र.सं. | विषयः | प्रबन्धस्य नाम | अध्यापकानां हस्ताङ्कनम् |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |

विभागाध्यक्षस्य हस्ताङ्कनम्

प्राचार्यस्य हस्ताङ्कनम्

# संस्कृतराष्ट्रगीतम्

गुणगणमण्डितयदुवरलसिता
राजति भारतमाता ।
नीतिबोधकपरात्परगीता
बोधकयोगिजनाप्ता ।
दिव्यसुरालयसरिदाक्रीडै–
र्भव्यसुललितनिजाङ्गा ।
अभिमतसिद्ध्या धन्या
शुभफलवृद्धिसुमान्या ।
जीयाद्भारतशोभा ।
अनुदिनमङ्गलदायकदयया
भारतमाता जयतात् ।
जयतात् जयतात् जयतात् ।
निजजनगणमवतात्
भारतमाता जयतात् ॥

-अग्निहोत्री श्रीमान् अलेवूरुसीतारामाचार्यः

SMSP. Sanskrit College, Udupi – 576101. Karnataka.
Ph. No. : 0820-2521441 (O), 9844029551 / 9481963567 (M)
E-Mail : smspsanskritcollege.udupi@gmail.com
Website : www.smspudupi.in